पूर्व्वेषां पित्रादीनां त्रयाणां क्रमः पूर्व्वक्रमस्तेनागतो यो भोगस्तस्माद्विना आगमोऽभ्यधिक इति सम्बन्धः। स पुनरागमादभ्यधिकः आगमनिरपेक्षः प्रमाणमित्यर्थः तत्राप्यागमज्ञाननिरपेक्षो न सत्त्वनिरपेक्षः सत्ता तु तेनैवावगम्यत इति बोद्धव्यम्। विना पूर्व्वक्रमागतादित्येतच्च स्मार्त्तकालप्रदर्शनार्थम्। "आगमोऽभ्यधिकोभोगादिति" च स्मार्त्तकालविषयम्। अतश्च स्मरणयोग्ये काले योग्यानुपलब्ध्यागमाभावनिश्चयसम्भवादागमज्ञानसापेक्षस्यैव भोगस्य प्रामाण्यम्। स्मार्त्ते तु काले योग्यानुपलब्ध्यभावेनागमाभावनिश्चयासम्भवादागमज्ञाननिरपेक्ष एव सन्ततो भोगः प्रमाणम्। एतदेव स्पष्टीकृतङ्कात्यायनेन। "स्मार्त्ते काले क्रिया भूमेः सागमा भुक्तिरिष्यते स्मार्त्ते त्वनुगमाभावात् क्रमात् त्रिपुरुषागता"। स्मार्त्तश्च कालो वर्षशतपर्य्यन्तः "शतायुर्वै पुरुष इति" श्रुतेः। अनुगमाभावादिति योग्यानुपलब्ध्यभावेनागमाभावनिश्चयाभावादिति। अतश्च वर्षशताधिको भोगः सन्ततोऽप्रतिरवः प्रत्यर्थिप्रत्यक्षस्यागमाभावे चानिश्चिते अव्यभिचारादाद्यिमागमः स्वत्वं गमयति। स्मार्त्तेऽपि कालेऽनागमस्मृतिपरम्परायां सत्यां न भोगः प्रमाणम्। अतएव "अनागमन्तु यो भुङ्क्ते बहून्यब्दशतान्यपि। चौरदण्डेन तम्पापन्दण्डयेत् पृथिवीपति"रित्युक्तम्। न चानागमन्तु यो भुङ्क्त इत्येकवचननिर्द्देशाद्बहून्यब्दशतान्यपीत्यपिशब्दप्रयोगात् प्रथमस्य पुरुषस्य निरागमे चिरकालोपभोगेऽपि दण्डविधानमिति मन्तव्यं द्वितीये तृतीये वा पुरुषे निरागमस्य भोगस्य प्रामाण्यप्रसङ्गात् नचैतदिष्यते 'आदौ तु कारणन्दानं मध्ये भुक्तिस्तु सागमेति" नारदस्मरणात्। तस्मात् सर्व्वत्र निरागमोपभोगे "अनागमन्तु योभुङ्क्त इत्येतद्द्रष्टव्यम् यदपि "अन्यायेनापि यद्भुक्तं पित्रा पूर्व्वतरैस्त्रिभिः। न तच्छक्यमपाहर्त्तुं क्रमात्त्रिपुरुषागतमिति"। पित्रा सह पूर्व्वतरैस्त्रिभिरिति योज्यम्। तत्रापि क्रमात् त्रिपुरुषागतमित्यस्मार्त्तकालोपलक्षणम्। त्रिपुरुषविवक्षायामेकवर्षाभ्यन्तरेऽपि पुरुषत्रयातिक्रमसम्भवाद्द्वितीये वर्षे निरागमस्य भोगस्य प्रामाण्यप्रसङ्गः तथा सति "स्मार्त्ते काले क्रिया भूमेः सागमा भुक्तिरिष्यत" इति स्मृतिविरोधः। "अन्यायेनापि यद्भुक्तमित्येतच्चान्यायेनापि भुक्तमपहर्त्तुन्न शक्यं किम्पुनर्न्यायान्निश्चय इति व्याख्येयमपिशब्दश्रवणात्। यच्चोक्तम्। 'यद्विनागममत्यन्तम्भुक्तं पूर्व्वैस्त्रिभिर्भवेत्। न तच्छक्यमपाकर्त्तुं क्रमात् त्रिपुरुषागतमिति" तत्राप्यत्यन्तमागमं विनेत्यत्यन्तमुपलभ्यमानमागमं विनेति व्याख्येयम्। न पुनरागमस्वरूपं विनेति आगमस्वरूपाभावे भोगशतेनापि न स्वत्वं भवतीत्युक्तं क्रमात्त्रिपुरुषागतमित्येतदुक्तार्थम्। ननु स्मरणयोग्ये काले भोगस्यागमसापेक्षस्य प्रामाण्यमनुपपन्नम्। तथाहि। यद्यागमः प्रमाणान्तरेणावगतस्तदा तेनैव स्वत्वावगमान्न भोगस्य स्वत्वे आगमे वा प्रामाण्यम् अथ प्रामाणान्तरेण नागमोऽवगतः कथन्तद्विशिष्टोभोगः प्रमाणम्। उच्यते। प्रमाणान्तरेणावगतागमसहित एव निरन्तरोभोगः कालान्तरे स्वत्वङ्गमयति। अवगतोऽप्यागमोभोगरहितो न कालान्तरे स्वत्वङ्गमयितुमलं मध्ये दानविक्रयादिना स्वत्वापगमसम्भवादिति सर्व्वमनवद्यम्। आगमसापेक्षो भोगः प्रमाणमित्युक्तम्। आगमस्तर्हि भोगनिरपेक्ष एव प्रमाणमित्यत आह। "आगमेऽपि बलं नैव भुक्तिस्तोकापि यत्र नो"या० यस्मिन्नागमे स्वल्पापि भुक्तिर्नैनास्ति तस्मिन्नागमे बलं सम्पूर्णं नैवास्ति। अयमभिसन्धिः स्वत्वनिवृत्तिपरस्वत्वापादनञ्च दानम्। परस्वत्वापादानं च परो यदि स्वीकरोति तदा सम्पद्यते नान्यथा। स्वीकारस्त्रिविधोमानसो वाचिकः कायिकश्चेति। तत्र मानसो ममेदमिति संकल्परूपः। वाचिकस्तु ममेदमित्याद्यभिव्यवहारोल्लेखी सविकल्पकः प्रत्ययः। कायिकः पुनरुपादानाभिमर्शनादिरूपोऽनेकविधः तत्र च नियमः स्मर्य्यते "दद्यात्कृष्णाजिनम्पुच्छे गां पुच्छे करिणङ्करे। केशरेषु तथैवाश्वन्दासीं शिरसि दापयेदिति"। आश्वलायनोऽप्याह। "अनुमन्त्रयेत् पाणिनाभिमृशेत् प्राणिनं कन्यां चेति"। तत्र हिरण्यवस्त्रादावुदकदानान्तमेवोपादानादिसम्भवात् त्रिविधोऽपि स्वीकारः सम्पद्यते। क्षेत्रादौ पुनः फलोपभोगव्यतिरेकेण कायिकस्वीकारासम्भवात् स्वल्पेनाप्युपभोगेन भवितव्यम्। अन्यथा दानक्रयादेः सम्पूर्णता न भवतीति फलोपभोगलक्षणकायिकस्वीकारविकलश्चागमो दुर्ब्बलो भवति तत्सहितादागमात्। एतच्च द्वयोः पूर्व्वापरकालापरिज्ञाने। पूर्व्वापरकालज्ञाने तु विगुणोऽपि पूर्व्वकालागम एव बलीयानिति। अथ वा "लिखितं साक्षिणो भुक्तिः प्रमाणं त्रिविधं स्मृत"मित्युक्तम्। एतेषां समवाये कुत्र कस्य प्राबल्यमित्यत्रेदमुपतिष्ठते। "आगमोऽभ्यधिको भोगाद्विनापूर्व्वक्रमागतात्। आगमेऽपि बलं नैव भुक्तिः स्तोकापि यत्र नो" इति अयमर्थः। आद्ये पुरुषे साक्षिभिर्भावितस्यागमो भोगादभ्यधिकोबलवान् पूर्व्वक्रमागताद् भोगाद्विना। स पुन पूर्व्वक्रमागतो भोगश्चतुर्थे पुरुषे लिखितेन भावितादागमात्बलवान् मध्यमे तु भोगरहितादागमात् स्तोकभोगसहितोऽप्यागमो बलवानिति। एतदेव